वस्य पाठस्वरादिभ्यो भेरनित्यतां बोधयति। तेन कदाचित् भेरप्राप्तौ यगादौ वृध क इत्यस्य वृध्यते इत्यादि अस्य तु वर्द्धते इत्यादिर्भेदः। इति दुर्गादासः॥

वर्द्ध, क्ली, ( वर्द्धयति पूरयतीति। वर्द्ध + अच्। ) सीसकम्। इति हेमचन्द्रः। ४। १०६॥

वर्द्धः, पुं, ( वर्द्धते इति। वृध् छेदने + अच्। ) ब्राह्मणयष्टिका। इति जटाधरः॥ पूर्त्तिः। छेदः। इति वर्द्धधात्वर्थदर्शनात्॥

वर्द्धकः, पुं, ( वर्द्धते इति। वृध् + ण्वुल्। ) ब्राह्मणयष्टिका। इत्यमरः। २। ४। ९०॥ ( वर्द्धयतीति। वर्द्ध पूरणे छेदने च + ण्वुल्। ) पूरके छेदके च, त्रि॥

वर्द्धकिः, पुं, ( वर्द्धते छिनत्तीति। वर्द्ध + अच्। वर्द्ध कषतीति। कष हिंसायां + बाहुलकात् डिः। ) त्वष्टा। इत्यमरः। २। १०। ९॥ ( यथा, रामायणे। १। १३। ७।

"कर्म्मान्तिकान् शिल्पकरान् वर्द्धकीन् खन-
कानपि।
गणकान् शिल्पिनश्चैव तथैव नटनर्त्तकान्॥")

वर्द्धकी, [ न् ] पुं, ( वर्द्धको वर्द्धोऽस्ति अस्येति। वर्द्धक + इनि। ) वर्णसङ्करजातिविशेषः। बढइ इति हिन्दी भाषा। तत्पर्य्यायः। त्वष्टा २ वर्द्धकिः ३ तक्षा ४ सूत्रधारः ५ रथकारः ६ रथकरः ७ काष्ठतट् ८ काष्ठतक्षकः ९। इति शब्दरत्नावली॥ ( यथा, वृहत्संहितायाम्। ४३। २२।

"अरभङ्गे बलभेदो
नेम्या नाशो बलस्य विज्ञेयः।
अर्थक्षयोऽक्षभङ्गे
तथाणिभङ्गे च वर्द्धकिनः॥" )

वर्द्धनं, क्ली, (वृध् छेदपूर्त्त्योः + ल्युट्।) छेदनम्। ( यथा, मनुः। २। २९।

"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते॥")

वृद्धिः। इति मेदिनी। ने, १२३॥

वर्द्धनः, त्रि, ( वर्द्धयतीति। वृध् + नन्द्यादित्वात् ल्युः। यद्वा, वर्द्धते तच्छील इति। वृध् पूर्त्तौ + "अनुदात्तेतश्चेति।" ३। २। १४९। इति युच्। ) वर्द्धिष्णुः। इत्यमरः। ३। १। २८॥ ( यथा, ऋग्वेदे। ३। ३२। १२।

"यज्ञो हि त इन्द्र वर्द्धनो भूदुत प्रियः सुतसोमो
मियेधः॥" )

वर्द्धनी, स्त्री, घटी। इति मेदिनी। ने, १२३॥ संमार्ज्जनी। इति हेमचन्द्रः। ४। ८२॥ सनालपात्रविशेषः। बद्‌ना इति भाषा। यथा,

"आलुः स्त्री कर्करी पात्री वर्द्धनी च गल-
न्तिका॥"

इति जटाधरः॥ * ॥

प्रतिष्ठादिकर्म्मणि तत्प्रयोजनं यथा,—

"प्रतिष्ठा यस्य देवस्य तदाख्यं कलसं न्यसेत्।
ऐशान्यां पूजयेद्‌याम्ये अर्ग्गेणैव च वर्द्ध-
नीम्॥
कलसं वर्द्धनीञ्चैव ग्रहान् वास्तोष्पतिं तथा।
आसने तानि सर्व्वाणि प्रणवाख्यं जपेद्‌गुरुः॥
सूत्रग्रीवं रत्नगर्भं वस्त्रयुग्मेन वेष्टितम्।
सर्व्वौषधीगन्धलिप्तं पूजयेत् कलसं गुरुः॥
देवन्तु कलसे पूज्य वर्द्धन्या वस्त्रमुत्तमम्।
वर्द्धन्या तु समायुक्तं कलसं भ्रामयेद्‌गुरुः॥
वर्द्धन्यौ धारया सिञ्चन्नग्रतो धारयेत्ततः।
अभ्यर्च्य वर्द्धनीकुम्भं स्थण्डिले देवमर्च्चयेत्॥"

इति गारुडे ४८ अध्यायः॥

वर्द्धमानः, पुं, ( वर्धते इति। वृध वृद्धौ + शानच्। ) एरण्डवृक्षः। इत्यमरः। २। ४। ५१॥ (अस्य पर्य्यायो यथा,—

"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पशुभेदः। शरावः। ( यथा, महाभारते। ७। ८०। १९।

"तथा गाः कपिला दोग्ध्रीः सवत्साः पाण्डु-
नन्दनः।
हेमशृङ्गी रूप्यखुरा दत्त्वा चक्रे प्रदक्षिणम्।
स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्च-
नान्॥"

अस्मिन्नर्थे क्लीवलिङ्गेऽपि दृश्यते। यथा, तत्रैव। १३। ६४। १२।

"मघासु तिलपूर्णानि वर्द्धमानानि मानवः।
प्रदाय पुत्त्रपशुमानिह प्रेत्य च मोदते॥"

तथा च सुश्रुते सूत्रस्थाने २९ अध्याये।

"स्त्री पुत्त्रिणी सवत्सा गौर्वर्द्धमानमलङ्कृता।
कन्या मत्स्याः फलं चामं स्वस्तिकं मोदका दधि॥")

विष्णुः। इति मेदिनी। ने, २०८॥ ( यथा, महाभारते। १३। १४९। ४१।

"वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः॥")

जिनविशेषः। तत्पर्य्यायः। वीरः २ चरमतीर्थकृत् ३ महावीरः देवार्य्यः ५ ज्ञातनन्दनः ६। इति हेमचन्द्रः। १। ३०॥ धनिनां गृहविशेषः। यथा,—

"स्वस्तिको वर्द्धमानश्च नन्द्यावर्त्तादयोऽपि च॥"

इति हलायुधः॥

( यथा, वृहत्संहितायाम्। ५३। ३३।

"द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्तत-
श्चान्यः।
तद्वच्च वर्द्धमाने द्वारन्तु न दक्षिणं कार्य्यम्॥")

स्वनामख्यातदेशः। यथा,—

"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्‌ज्योतिषोदयाद्रयः॥"

इति ज्योतिस्तत्त्वे कूर्म्मचक्रम्॥

( भद्राश्ववर्षस्य कुलपर्व्वतविशेषः। यथा, मार्कण्डेये। ५९। १२।

"विशालः कम्बलः कृष्णो जयन्तो हरिपर्व्वतः।
विशोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः॥"

वृद्धिविशिष्टे, त्रि॥ )

वर्द्धमानकः, त्रि, ( वर्द्धमान + स्वार्थे संज्ञायां वा कन्। ) वृद्धिविशिष्टः। पुं, शरावः। इत्यमरः। २।९।३२॥ ( यथा, महाभारते। १४।६५।१४।

"भृङ्गाराणि कटाहानि कलसान् वर्द्धमान-
कान्॥")

स्वार्थे कप्रत्यये एरण्डवृक्षश्च॥ (आरात्रिकम्। इति महाभारतटीकायां नीलकण्ठः॥ यथा, महाभारते। ७। ५५। ४।

"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्वर्द्धमानकैः।
नित्योद्योगैश्च क्रीड़द्भिस्तत्र स्म परिहर्षिताः॥")

वर्द्धापनं, क्ली, नाड़ीच्छेदनम्। यथा,—

"अर्द्धरात्रे वसोर्धारां पातयेद्‌गुड़सर्पिषा।
ततो वर्द्धापनं षष्ठीं नामादेः करणं मम॥
कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः॥"

वर्द्धापनं नाड़ीच्छेदनम्। इति तिथ्यादितत्त्वम्॥

वर्द्धितं, त्रि, ( वृध् + क्तः। ) प्रवृद्धम्। छिन्नम्॥ पूरितम्। इति मेदिनी। ते, १४८॥ ( परिपूर्णम्। यथा, मनुः। ३। २२४।

"पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत॥"

"अन्नस्येति तृतीयार्थे षष्ठी। वर्द्धितं पूर्णं पिठरादिपात्रम्।" इति तट्टीकायां कुल्लूकभट्टः॥

वृध + णिच् + क्तः। वृद्धिं प्रापितम्। यथा, भागवते। ४। २३। १।

"दृष्ट्वात्मानं प्रवयसमेकदा वैण्य आत्मवान्।
आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजापतिः॥")

वर्द्धिष्णुः, त्रि, ( वर्द्धते इति। वृध + "अलङ्कृञिति।" ३। २। १३६। इति इष्णुच्। ) वर्द्धनशीलः। तत्पर्य्यायः। वर्द्धनः २। इत्यमरः। ३। १। २८॥ (यथा, भट्टिः। ५। १।

"निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम्।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ॥")

वर्द्ध्र, क्ली, ( वर्द्धते दीर्घीभवतीति। वृध् + "वृधिवपिभ्यां रन्।" उणा० २। २७। इति रन्।) चर्म्म। इत्युणादिकोषः॥ ( यथा, अथर्व्ववेदे। १४। १। ६०।

"त्वष्टा पिपेश मध्यतोऽनुवर्द्ध्रान्त्सा नो अस्तु
सुमङ्गली॥")

वर्द्ध्री, स्त्री, ( वर्द्ध्र + गौरादित्वात् ङीष्। ) चर्म्मरज्जुः। बद्धी इति भाषा। तत्पर्य्यायः। नद्ध्री २ वरत्रा ३। इत्यमरः॥ वद्धी ४। इति भरतः॥

वर्पः, [स्] क्ली, ( वृणीते संपृक्तं भवतीति। वृ + "वृङ्शीङ्भ्यां स्वरूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन् पुड़ागमश्च। ) रूपम्। इत्युणादिकोषः॥ ( यथा, ऋग्वेदे। १।१४०।५।

"आदस्य ते ध्वसयन्तो वृथेरते
कृष्णमभ्वं महि वर्पः करिक्रतः॥"

स्तोत्रम्। यथा, तत्रैव। १। ३९। १।

"कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ
कंह धूतयः॥"

"कस्य यजमानस्य क्रत्वा क्रतुना यज्ञश्चेष्ट इति